# केन्द्रीय संस्कृत विश्वविद्यालयः नई दिल्ली

**राष्ट्रियपुस्तकालयसप्ताहस्य 2025 उपोद्घातः -महोत्सवस्य प्रतिवेदनम्**

**उपोद्घातः दिनाङ्काः 14–20 नवम्बर् 2025**

**“संस्कृतं ज्ञानविज्ञानयोः स्रोतः**

## केन्द्रीयसंस्कृतविश्वविद्यालयः


**गुरुवायूर्-परिसर**
**“नारायणीयम्” महाकवि मेल्पुत्तूरनारायणभट्टतिरि-ज्ञानसंसाधनकेन्द्रम्**
**पुराणट्टुकारा पी.ओ., त्रिशूर- 680551 (केरल)**
Phone No: 0487-230771
dr.rautmale.anand@csu.co.in







प्रो.आनन्दरौत्माले
उपपुस्तकपालः

प्रो.के.के.षैन्
निर्देशकः

## Vice-Chancellor



**आचार्यः श्रीनिवासः वरखेडी**
**माननीयः कुलपतिः**

# केन्द्रीयसंस्कृतविश्वविद्यालयः

**56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058**

## राष्ट्रियपुस्तकालयसप्ताहस्य 2025 उपोद्घातः -महोत्सवस्य प्रतिवेदनम्

### भूमिका

केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरे राष्ट्रियपुस्तकालयसप्ताहस्य २०२५ महोत्सवः नवम्बर्-मासस्य १४ तः २० दिनाङ्कपर्यन्तम् अत्यन्तेन उत्साहेन, शैक्षिकगौरवेण च आयोजितः। अस्मिन् वर्षे सप्ताहस्य मुख्यविषयः आसीत् "संस्कृतं ज्ञानविज्ञानयोः स्रोतः" इति। अनेन संस्कृतभाषायाः, शास्त्रपरम्परायाः, विज्ञानपरम्परायाः च महत्त्वं विशेषरूपेण प्रतिपादितम्।



"नारायणीयम्" महाकवि मेल्पुत्तूरनारायणभट्टतिरि-ज्ञानसंसाधनकेन्द्रम्

भारते प्रतिवर्षं बालदिवसादारभ्य, अर्थात् नवम्बर्-मासस्य १४ दिनाङ्के, राष्ट्रियपुस्तकालयसप्ताहः सम्पूर्णदेशे आचर्यते। एतत् दिनं पण्डितजवाहरलालनेहरोः जन्मतिथिः भवति। पण्डितः नेहरूमहोदयः पुस्तकाश्रयणस्य, पठनपरम्परायाः, बालबौद्धिकविकासस्य च अत्यन्तं महत्त्वं जानाति स्म। तेनैव उक्तं यत् पठनं मानवस्य जीवनं निर्मलयति, ज्ञानं विस्तारयति, विवेकं ददाति च। तदर्थं **National Book Trust (NBT)** इति संस्थया नवम्बर्-मासस्य १४–२० पर्यन्तं राष्ट्रियपुस्तकालयसप्ताहः, **2025** सम्पूर्णदेशे आरब्धः, तेन सर्वभाषासु ग्रन्थपरीक्षां, पठनरुचिं च विकासयितुं यत्नः कृतः।

एतादृश्यां राष्ट्रियपृष्ठभूमौ गुरुवायूर्-परिसरेऽपि सप्ताहोत्सवः विशेषरूपेण आयोजितः। विश्वविद्यालयस्य माननीयः कुलपतिः सर्वेषु १२ परिसरेषु राष्ट्रियपुस्तकालयसप्ताहस्य आयोजनम् अनिवार्यम् इति सूचितवान्। तेन उपदिष्टं यत् पुस्तकालयः केवलं पुस्तकानां स्थानं न, किन्तु अध्ययनस्य, अध्यापनस्य, अनुसन्धानस्य, संस्कृतिसंरक्षणस्य च केन्द्रम् अस्ति। अस्य विचारस्य प्रेरणया गुरुवायूर्-पुस्तकालयसमूहेन आसप्ताहं विविधाः महत्त्वपूर्णाः कार्यक्रमाः योजिताः, ये छात्राणां पठनरुचिं जागरयन्ति, बौद्धिकसंवादं वर्धयन्ति, ज्ञानजगत् प्रति अनुरागं जनयन्ति च। इतिहासे पठनसंस्कृतेः विकासः मनुष्यस्य ज्ञानयात्रायाः महत्त्वपूर्णः अंशः अस्ति। ३५०० ईशवीयपूर्वसमयादारभ्य लेखनसंस्कृतिः, पाण्डुलिपिपरम्परा, तदनन्तरं १५ शताब्द्यां मुद्रणयन्त्रस्य आविष्कारः, एताः सर्वाः प्रक्रियाः ज्ञानविस्तारस्य पृष्ठभूमिरूपाः अभवन्।

आधुनिकयुगेऽपि पठनसंस्कृतिः नूतनाभिः समस्याभिः प्रभाविता अस्ति। यथा- डिजिटल्-इत्यस्याश्रयणम्, अल्पध्यानशक्तिः, पठनरुचिह्रासः इत्यादयः। अतः राष्ट्रियपुस्तकालयसप्ताहः अस्मान् स्मारयति यत् पठनम् अनिवार्यम्, ज्ञानं जीवनस्य आधारः, पुस्तकालयः समाजस्य चेतः इति।

अस्मिन् सप्ताहे गुरुवायूर्-परिसरे "नारायणीयम्" ज्ञानसंसाधन-केन्द्रे दुर्लभग्रन्थप्रदर्शनम्, नवागतग्रन्थ-हस्तलिखितप्रदर्शनम्, विशेषज्ञव्याख्यानानि, पठनसत्राणि, पुस्तकालयाभिमुखीकरणकार्यक्रमाः, संस्कृत-लेखक-प्रश्नोत्तरीस्पर्धा, पुस्तकवार्तासत्रम्, पुस्तकसमालोचनप्रतियोगिताः, डिजिटल्-साक्षरता-कार्यशाला, सांस्कृतिककार्यक्रमाः च विविधरूपेण आयोजिताः। एते सर्वे कार्यक्रमाः शिक्षकेभ्यः, अशैक्षणिककर्मचारिभ्यः, छात्रेभ्यः च अत्यन्तं रुचिकराः अभवन्। एवं सप्ताहोत्सवस्य आयोजनं पुस्तकालयस्य प्रतिजनमानसम् उत्साहम् अवर्धयत्, पठनसंस्कृतेः महत्त्वं पुनः प्रास्थापयत्, तथा परिसरस्य शैक्षिकजीवनम् अधिकं समृद्धम् अकरोत्।

**उद्घाटनसमारोहः - 14 नवम्बर् 2025 (12:00 – 1:30 अपराह्णे)**

नवम्बर्-मासस्य १४ तमे दिवसे राष्ट्रियपुस्तकालयसप्ताहस्य २०२५ उद्घाटनसमारोहः गुरुवायूर्-परिसरस्य महाकविमेल्पुत्तूरनारायणभट्टत्तिरिज्ञानसंसाधनकेन्द्रे अत्यन्तं सुष्ठु सम्पन्नः। समारम्भः द्वादशवादने (१२:०० मध्याह्ने) समये जातः। सर्वे विशिष्ट-अतिथयः, आचार्याः, अशैक्षणिक-कर्मचारिणः, पुस्तकालय-कर्मचारिणः, विद्यार्थिजनाश्च आदरपूर्वकं स्वागतं प्राप्तवन्तः।







प्रथमम् उद्घाटनभाषणं प्रो. आनन्दरौत्माले (उपपुस्तकपालः तथा कार्यक्रमसंयोजकः) कृतवान्। महोदयोऽयं सर्वान् सादरम् अभिनन्द्य राष्ट्रियपुस्तकालयसप्ताहस्य महत्त्वं विस्तरेण अवोचत्। तेन उक्तं यत् नवम्बर्-मासस्य १४–२० पर्यन्तं समग्रदेशे एषः सप्ताहः पठनसंस्कृतेः संवर्धनाय, पुस्तकालयोपयोगस्य प्रचाराय, ज्ञानविस्ताराय च आयोजितः। आधुनिकयुगस्य अध्ययन-पद्धतिषु पुस्तकालयस्य प्रमुखभूमिका अस्ति इत्यपि तेन प्राकाश्यत।

अनन्तरम् अध्यक्षभाषणं प्रो. के. के. षैन्-महोदयेन (परिसर-निर्देशकः) दत्तम्। सः पुस्तकालयसमूहस्य योजनां, परिश्रमं, सप्ताहस्य सुयोजितकार्यक्रमान् च प्रशंसन् आह "छात्राणां पठनरुचिवर्धनम् अत्यन्तम् आवश्यकम्। आधुनिकतायां डिजिटल्सौविध्येन सह पुस्तकालयस्य विकासः अतीव आवश्यकः।" तेन विश्वविद्यालयस्य पुस्तकालय-सौविध्यविस्तारस्य लक्ष्यम् अपि सूचितम्।

तत्रैव अतिथिभाषणं प्रो. आर्. प्रतिभा-महोदया (सहनिदेशिका) कृतवती। सा अवदत् यत् पुस्तकालयः ज्ञानस्य केन्द्रम् अस्ति, यत्र केवलं ग्रन्थाः न, अपि तु नवीनविचाराः, अनुसन्धानम्, तर्कशक्ति-विकासः च सम्भवन्ति। सा विद्यार्थिनः विविध-शैक्षिक-कार्यक्रमेषु सहभागं गृहीतुं प्रोत्साहितवती।

तत्पश्चात् विशेषभाषणं प्रो. ई. आर्. नारायणन्-महोदयेन (साहित्यविभागाध्यक्षः) दत्तम्। तेन संस्कृतपाण्डुलिपयः, प्राचीन-साहित्यपरम्परा, शास्त्रग्रन्थाः च कथम् अद्यापि अध्ययनाय प्रेरणां ददति इति सुन्दररूपेण निरूपितम्। सः विद्यार्थिनः पुस्तकालये संस्थितानां ग्रन्थानाम् उपयोगं कर्तुं, संस्कृतसाहित्यस्य गाम्भीर्यं ज्ञातुं च प्रेरितवान्।
सम्पूर्णकार्यक्रमः डा. राधिका पी. आर्.-महोदयया सुयोजितः आसीत्। सा कार्यक्रमस्य प्रवाहं सुन्दरं कृतवती, शिष्टतापूर्वकं मञ्चसञ्चालनं च कृतवती।

अन्तिमे नन्दु-महोदयेन (पुस्तकालयपरिचारकः) हार्दाः धन्यवादाः ज्ञापिताः। सः अतिथिजनान्, आचार्यवर्गं, कर्मचारिसदस्यान्, छात्रान् च कृतज्ञतापूर्वकम् अभिवाद्य उद्घाटनसमारोहस्य सफलतां घोषितवान्। एवं नवम्बर्-मासस्य १४ तमदिनस्य उद्घाटनकार्यक्रमः अत्यन्तं प्रेरणादायकः, शैक्षिकः सफलश्च अभवत्।

1. **<u>ग्रन्थालयवाचनाभ्यासप्रश्नोत्तरीप्रतियोगिता</u> (प्रथम–पर्यायः) १४ नवम्बर् २०२५ (समयः – अपराह्न ३.००–५.३०)**

राष्ट्रियपुस्तकालयसप्ताहः २०२५ उद्घाटनदिने नवम्बर्-मासस्य १४ तमे दिने "नारायणीयम्" महाकवि-मेल्पुत्तूर-नारायणभट्टतिरि-ज्ञानसंसाधनकेन्द्रे ग्रन्थालयवाचनाभ्यासविषये प्रश्नोत्तरीप्रतियोगिता सुव्यवस्थितरूपेण आयोजिता। सः कार्यक्रमः अपराह्ने ०३:०० वादनात् ०५:०० वादनपर्यन्तं सम्पन्नः।



एषा प्रतियोगिता विशेषरूपेण B.Ed. (Pedagogy) प्रथमवर्षस्य विद्यार्थिभ्यः आयोजिता। अस्य उद्देश्यम् आसीत् ग्रन्थालयसाधनानां ज्ञानम्, वाचनसंस्कारः, शैक्षणिकनैतिकता, सन्दर्भलेखनपद्धतिः, साहित्यसामान्यज्ञानस्य च वर्धनम्। प्रथमपर्याये ५५ विद्यार्थिजनाः उत्साहेन सहभागं कृतवन्तः। प्रश्नोत्तरीप्रतियोगितायाः विषयाः आसन् ग्रन्थालयोपयोगः, ग्रन्थलेखकपरिचयः, वाचनशीलता, साहित्य–सामान्यज्ञानम्, पुस्तक–नैतिकता इत्यादयः। छात्राः उत्तमं संयोजनम्, सुयोग्यम् अध्ययनम्, तथा समूहकार्यभावं प्रदर्शितवन्तः। कार्यक्रमस्य यथोचितं समन्वयनं प्रो. आनन्दरौत्माले-महोदयेन कृतम्। तस्मै सहायतां कृतवन्तः डॉ. श्यामराज् सी, श्री राजेश् अरविन्दः, अबिबाबू के. बी., नन्दु पंकज्, सौरव् सूरनद्रन् च। एते सर्वे प्रश्ननिर्माणम्, समय–परिगणनम्, मूल्यमापनम्, आयोजनं पर्यवेक्षणं च अकुर्वन्।

५५ प्रतिभागिनां मध्ये २३ विद्यार्थिनः ९७% इत्यधिकान् अङ्कान् प्राप्तवन्तः। अतीवसमीपस्थाङ्कानां कारणात् निर्णायकानां कृते विजेतॄणां चयनं कष्टकरम् अभवत्। तस्मात् समित्या सर्वसम्मतिपूर्वकनिर्णयः स्वीकृतः यत् द्वितीयपर्यायः (Re-Exam) अनिवार्यः भवेत्। अतः २३ योग्या¬ विद्यार्थिजनाः १९ नवम्बर् २०२५ तमे दिने पुनः परीक्षायां सहभागं करिष्यन्ति इति निश्चितम्। समग्रतया प्रथमपर्यायः अत्यन्तं सफलः आसीत्। एषा प्रतियोगिता विद्यार्थिषु ग्रन्थालयजागरूकताम्, स्वस्थशैक्षणिकस्पर्धाम्, वाचनसंस्कृतेः विकासं च सम्पादितवती।

**<u>दुर्लभग्रन्थप्रदर्शनं नूतनग्रन्थ–पाण्डुलिपि–प्रदर्शनं च</u> :** (१५–१६ नवम्बर् २०२५)

राष्ट्रियपुस्तकालयसप्ताहस्य २०२५ इत्यस्य कार्यक्रमश्रृङ्खलायां गुरुवायूर्-परिसरस्य केन्द्रीयपुस्तकालयेन नवम्बर्-मासस्य १५, १६ तमयोः दिनयोः द्वे महत्त्वपूर्णे प्रदर्शने सुयोजनया आयोजिते। अस्य उद्देश्यम् आसीत् परिसरे वाङ्मयपरम्परायाः संवर्धनम्, नवीन-अध्ययनसाधनानां परिचयः, पुस्तकालयोपयोगस्य प्रोत्साहनं च।




**प्रदर्शने अध्यापकवर्गस्य, अनध्यापककर्मचारिवर्गस्य, विद्यार्थिजनस्य च अतीव सहभागः**

**<u>2.१. दुर्लभग्रन्थप्रदर्शनम् :</u>** १५ नवम्बर् २०२५, प्रातः ८:०० – सायं ४:००

अस्मिन् प्रदर्शने अध्यापकवर्गस्य, अनध्यापककर्मचारिवर्गस्य, विद्यार्थिजनस्य च अतीव सहभागः अभवत्। पुस्तकालयस्य संरक्षितेषु  दुर्लभेषु संस्कृतग्रन्थेषु, प्राचीनपाण्डुलिपिषु, आद्यसंस्करणेषु, कोशशास्त्रीयग्रन्थेषु, तथा इतिहाससम्मतमुद्रितपुस्तकेषु यथायोग्यं वर्गीकरणं कृतम्।






**दुर्लभग्रन्थप्रदर्शनम्**

प्रो. आनन्दरौत्माले-महोदयेन पुस्तकालयसमूहेन सह सुयोजितं व्यवस्थापनम् अकारि। प्रत्येकवस्तूनां कृते सूचनापत्रिकाः दत्ताः, येन दर्शकाः मुद्रणपरम्परायाः विकासं, भाषिकदस्तावेजसंरक्षणम्, ज्ञानपरम्परायाः गतिं च अवगन्तुं शक्नुयुः। अनेकैः आगन्तुकैः एतत् प्रदर्शनम् अत्यन्तं प्रशंसितम्। सर्वे अपि अस्माकं पुस्तकालये संरक्षितानां दुर्लभग्रन्थानां दुर्लभदर्शनं लब्धुम् अत्यन्तं संतुष्टा अभवन्। प्रदर्शनं सांस्कृतिकपद्धतेः संरक्षणं कियत् आवश्यकम् इति संदेशः सम्यक् रूपेण प्रदत्तः।

**3.२. <u>नूतनग्रन्थपाण्डुलिपिप्रदर्शनम्</u>** (१६ नवम्बर् २०२५, अपराह्णे १:०० – सायं ५:३०)

अस्य द्वितीयदिने पुस्तकालये नूतनतया आगतानां ग्रन्थानां, सन्दर्भग्रन्थानां, शिक्षण–साहित्यविषयकग्रन्थानां च प्रदर्शनम् अकारि। नानाशाखाभ्यः योगदानरूपेण प्राप्ताः पाण्डुलिपयः अपि सुन्दररूपेण प्रदर्शिताः। विद्यार्थिभ्यः अध्यापकवर्गाय च पारम्परिकलिपिषु, लेखन–शैलीषु, अनुसंधानविधिषु च उत्तमपरिचयः अभवत्। एवं नूतनसंग्रहस्य अवलोकनं शैक्षिक-अनुसंधानकार्ये प्रयोजनीयमार्गदर्शनं दत्तम्।







**नूतनग्रन्थपाण्डुलिपिप्रदर्शनम्**

**उपसंहारः-** उभयोः प्रदर्शनयोः माध्यमेन पुस्तकालयोपयोगः, अध्ययनजिज्ञासा, वाङ्मयरुचिः च अत्यन्तं वर्धिता। छात्रशिक्षकसमुदायस्य  सहभागः पुस्तकालयं ज्ञानसंस्कृतेः केन्द्ररूपेण दृढतरं स्थापितवान्। एते कार्यक्रमाः गुरुवायूर्-परिसरपुस्तकालयस्य सफलतां स्पष्टं प्रदर्शयन्ति।

**4. <u>संस्कृत–पुस्तक–समालोचन–वाचिक–प्रतियोगिता</u> :** १७ नवम्बर् २०२५

राष्ट्रियपुस्तकालयसप्ताहस्य २०२५ अन्तर्गते नवम्बर्-मासस्य १७ तमे दिने "नारायणीयम्" महाकवि-मेल्पुत्तूर-नारायणभट्टतिरि-ज्ञानसंसाधनकेन्द्रे संस्कृतपुस्तकसमालोचनलेखनप्रतियोगिता सुयोजितरूपेण आयोजिता। अपराह्णे ३:०० वादनात् ५:३० वादनपर्यन्तं कार्यक्रमः सम्पन्नः। अस्मिन् अवसरे आचार्यवर्गस्य २५ विद्यार्थिभागिनः उत्साहपूर्वकं सहभागिभूताः।




प्रतिभागिनः स्वचितसंस्कृतग्रन्थसम्बद्धानां संरचितानां, विश्लेषणात्मकानां, तथा तात्त्विकदृष्ट्या गहनलेखबद्धानां पुस्तकानां समालोचनाः प्रस्तोतुम् आगतवन्तः। लेखनरूपेण प्रस्तुताः समालोचनाः ग्रन्थस्य विषयगौरवम्, लेखनशैलीं, तत्त्वबोधं, साहित्यगतमहत्त्वं च उज्ज्वलरूपेण प्रदर्शितवत्यः। कार्यक्रमस्य मार्गदर्शनं, परीक्षणं च डॉ. के. बी. श्रुतिमहोदया, डॉ. आशा ई. महोदया, डॉ. वीणा-चन्द्रन्-महोदया च कृतवत्यः। तासां विशेषपरामर्शः विद्यार्थिनां लेखनकौशलविकासे, विश्लेषणशक्तेः वृद्धौ, तथा समालोचनात्मकचिन्तनस्य संवर्धने अतिशयेन उपकारी अभवत्। निर्णायकैः दत्ताः सूचनाः प्रतियोगितां विद्यानुकूलाम् अकुर्वन्। एतस्य कार्यक्रमस्य मुख्यलक्ष्यमासीत् विद्यार्थिनाम् आलोचनात्मकचिन्तनम्, सूक्ष्मविश्लेषणशक्तिः, सुसङ्गतलेखनशैली, ग्रन्थबोधः चेत्येतान् विकासयितुम्। २० विद्यार्थिनां सहभागः अत्यन्तं सरसः आसीत्। प्रत्येकं प्रस्तुतेः मौलिकता, स्पष्टता, तथा सुविदग्धभाषाप्रयोगः विशेषतया दृष्टः। सर्वसामान्यतया एषा संस्कृतपुस्तकसमालोचन-लेखनप्रतियोगिता अत्यन्तं सफलतापूर्वकं सम्पन्ना। अस्य कार्यक्रमस्य फलस्वरूपेण विद्यार्थिनां संस्कृतसाहित्यरुचिः वर्धिता, लेखनविश्वासः दृढीकृतः, पुस्तकालयोपयोगस्य महत्त्वं च पुनः प्रतिपादितम्। राष्ट्रियपुस्तकालयसप्ताहे अस्याः प्रतियोगितायाः आयोजनं शैक्षणिकसांस्कृतिकदृष्ट्या अतीव महत्त्वपूर्णं जातम्।

**5. <u>संस्कृतपुस्तकसमालोचनलेखनप्रतियोगिता</u>** : १८ नवम्बर् २०२५

राष्ट्रियपुस्तकालयसप्ताहे २०२५ कार्यक्रमसमुच्चये नवम्बर्-मासस्य १८ तमे दिने "नारायणीयम्" महाकवि-मेल्पुत्तूर-नारायणभट्टतिरि-ज्ञानसंसाधनकेन्द्रे संस्कृतपुस्तकवाचिकसमालोचनाप्रतियोगिता सम्यग्रूपेण आयोजिता। अपराह्णे ३:०० वादनात् ५:०० वादनपर्यन्तं कार्यक्रमः सम्पन्नः। अस्यां प्रतियोगितायां शास्त्रिकक्षायाः २५ विद्यार्थिजनाः उत्साहपूर्वकं सहभागं कृतवन्तः।







**परिसरीयप्राध्यापकाः छात्राश्च**

विद्यार्थिभिः स्वचितसंस्कृतग्रन्थसम्बद्धाः सूक्ष्माः, विचारसमृद्धाः च वाचिकसमीक्षाः प्रस्तुताः। प्रत्येकं प्रस्तुतेः अन्तर्गतं विषयवस्तु, साहित्यशैली, तात्त्विकमतानि, संस्कृतपरम्परायाः गाम्भीर्यं च अत्यन्तं स्पष्टरूपेण प्रकाशितानि। तासां प्रस्तुतीनां माध्यमेन विद्यार्थिनां विश्लेषणशक्तिः, वाचन–कौशलम्, तथा साहित्यबोधः प्रशंसार्हः आसीत्।

प्रतियोगितायाः मूल्याङ्कनं मार्गदर्शनं च निर्णायकमण्डलेन कृतम्। निर्णयकर्तारः आसन् डॉ. पी. के. श्रीनीवासन्-महोदयः, डॉ. पी. आर्. राधिका-महोदया, डॉ. पी. मालिनी-महोदया च। तेषां रचनात्मकाः परामर्शाः विद्यार्थिनां वाचिकप्रस्तुतीकरणकौशलं वर्धयितुम्, समालोचनात्मकचिन्तनम् उन्नतीकर्तुं, साहित्यगौरवम् अनुभावयितुं च अत्यन्तम् उपकारकाः अभवन्। अध्यापक-अनध्यापक-कर्मचारि-विद्यार्थिनां च सक्रियोपस्थितिः कार्यक्रमस्य वातावरणम् अत्यन्तं प्रेरणादायकं कृतवती। प्रतिभागिनः परस्परं श्रुत्वा स्वस्य प्रस्तुतीः अधिकं सौकर्यपूर्णतया संशोधयितुं प्रेरिताः। अन्ते, एषा संस्कृतपुस्तकवाचिक–समालोचनाप्रतियोगिता सफलतापूर्वकं सम्पन्ना। विद्यार्थिनां साहित्यरुचिः, आत्मविश्वासः, पुस्तकालयोपयोगजागरूकता च वर्धिता। राष्ट्रियपुस्तकालयसप्ताहे अस्य आयोजनस्य शैक्षणिकसांस्कृतिकमहत्त्वं विशेषरूपेण प्रकाशितम्।

6. **संस्कृत–लेखक–ग्रन्थ–प्रश्नोत्तरी–प्रतियोगिता (द्वितीय–पर्यायः) १९ नवम्बर् २०२५ (अपरा. ३:०० – ५:००)**

राष्ट्रियपुस्तकालयसप्ताहस्य, २०२५ अन्तर्गतः "संस्कृतलेखकपुस्तकप्रश्नोत्तरीप्रतियोगितायाः" द्वितीयपर्यायः नवम्बर्-मासस्य १९ तमे दिने महाकविनारायणभट्टतिरिज्ञानसंसाधनकेन्द्रे (केन्द्रीयग्रन्थालये) सुव्यवस्थितरूपेण आयोजितः। अयं द्वितीयपर्यायः तेषां विद्यार्थिनां कृते आसीत्, ये प्रथमे पर्याये (१४ नवम्बर् २०२५) उच्चतमाङ्कान् लब्धवन्तः।

प्रथम–पर्याये ५५ विद्यार्थिनां मध्ये २३ विद्यार्थिजनाः ९७% इत्यधिकान् अङ्कान् प्राप्तवन्तः। अतिसमीपस्थ–अङ्कफलानां कारणात् निर्णायकानां कृते विजेतॄणां चयनं कठिनम् अभवत्। अतः न्यायपूर्णं निर्णयं सुनिश्चेतुं समित्या द्वितीयपर्यायस्य पुनः परीक्षायाः आयोजनम् आवश्यकम् इति निश्चितम्। निर्धारितदिने २३ योग्यानां मध्ये २० विद्यार्थिजनाः उपस्थिताः।

द्वितीय–पर्याये विशेषतः "संस्कृत–लेखकाः तथा तेषां कृतयः" इति विषयः उपन्यस्तः। अस्यां परीक्षायां लेखक–परिचयः, ग्रन्थ–सम्बन्धः, काव्यनाट्यशास्त्रसाहित्यपरम्परा, चिरन्तनग्रन्थानां विवरणम् इत्यादिषु प्रश्नाः सन्निहिताः। विद्यार्थिजनाः उत्साहेनैव उत्तरदानं कृतवन्तः। तेषां स्मरणशक्तिः, विश्लेषणशक्तिः, साहित्य–ज्ञानं च उत्कृष्टतया दृश्यन्ते स्म। अस्य कार्यक्रमस्य निर्देशनं प्रो. आनन्दरौत्माले-महोदयेन कृतम्। तस्य सहकार्ये डॉ. वेणुगोपालरावः तथा डॉ. शिवाजी वी. एन्. महोदयौ आस्ताम्। ते सर्वे प्रश्ननिर्माणम्, समयनियमनम्, मूल्यमापनं च कुशलतया अकुर्वन्।

द्वितीयपर्यायः शान्तिपूर्वकं सफलतया समाप्तः। अस्मात् कार्यक्रमात् विद्यार्थिनां संस्कृत–साहित्ये गभीररुचिः विकसिता, राष्ट्रियपुस्तकालयसप्ताहस्य शैक्षणिकभावना अधिकं दृढीकृता।



**दिनाङ्कः – २० नवम्बर् २०२५ | समयः – अपराह्णः ३.००–५.३०**

**<u>समापनसमारोहवृत्तान्तः, राष्ट्रियपुस्तकालयसप्ताहः</u> १४–२० नवम्बर् २०२५**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरे राष्ट्रियपुस्तकालयसप्ताहस्य २०२५ इत्यस्य समापनसमारोहः नवम्बर्-मासस्य २० तमे दिने अत्यन्तं गरिमायुक्त-वातावरणे "नारायणीयम्" महाकवि-मेल्पुत्तूर-नारायणभट्टतिरि- ज्ञानसंसाधन-केन्द्रे सम्पन्नः। १४–२० नवम्बर्-पर्यन्तं यः सप्ताहोत्सवः प्रचलितः, सः विविधैः शैक्षिकैः, साहित्यिकैः, सांस्कृतिकैः कार्यक्रमैः समृद्धतां प्राप्तवान्, पुस्तकालयस्य ज्ञानसंवर्धन-मूल्यात् सर्वान् पुनः परिचितवान् च।





समारम्भः अपराह्ने ३ वादने प्रतिष्ठित-अतिथिजनानां सान्निध्येन आरब्धः। परिसरनिदेशकः प्रो. के. के. षैन्, मुख्यातिथिः प्रो. के. ई. मधुसूदनन्, सहनिदेशिका प्रो. आर्. प्रतिभा, विभागाध्यक्षाः, आचार्यवर्गः, अशैक्षणिककर्मचारिणः, छात्रवर्गः, पुस्तकालयकर्मचारिवर्गश्च उपस्थिताः आसन्। एतेषां सर्वेषां सन्निधिः समारोहमाहात्म्यं विशिष्टमकरोत्। विशेषतया मुख्यातिथिना प्रदत्तं भाषणम् अत्यन्तं सारयुक्तम् आसीत्। स आधुनिकतायाः युगस्य प्रकाशे पुस्तकालयस्य भविष्यत्परिकल्पना, नवसौकर्याणां समुचितोपयोगः, संस्कृत-शास्त्रपरम्परायाः जागरणम्, तथा पाण्डुलिपि-परम्परायाः संरक्षणम् इत्यादीनि विशदरीत्या विवृतवान्। तेन उक्तं यत् पुस्तकालयाः केवलं ग्रन्थनिधयः न, अपि तु ज्ञाननिर्माणस्य, अनुसंधानविस्तारस्य, चिन्तनशक्तेः च ऊर्जःस्रोतांसि भवन्ति।












परिसरनिदेशकः प्रो. के. के. षैन्-महोदयः अपि स्वीय-उपसंहारवाक्षु सप्ताहे आयोजितानां सर्वेषां कार्यक्रमाणां दुर्लभपुस्तकप्रदर्शनस्य, नवागतग्रन्थप्रदर्शनस्य, हस्तलिखितप्रदर्शनस्य, व्याख्यानमालायाः, संस्कृत-लेखक-प्रश्नोत्तरी-प्रतियोगितायाः, पुस्तकवार्तासत्रस्य, पुस्तकसमालोचनाप्रस्तुतीनां च उत्कृष्टसफलत्वे प्रशंसाम् अकरोत्। सः विश्वविद्यालयस्य सर्वत्र पठनसंस्कृतेः प्रसारस्य अनिवार्यतां प्रकाशयन् छात्राणां पठनरुचिवृद्धेः आवश्यकतामपि पुनरवोचत्।

विविधस्पर्धासु विजेतारः स्वानुभवान् सभायां प्रस्तुतवन्तः। ते अवोचन् यत् एते कार्यक्रमाः आत्मविश्वासं वर्धितवन्तः, पठन-कौशलं विकसितवन्तः, तथा साहित्यबोधं गाढं कृतवन्तः। आचार्यवर्गेण पुस्तकालयोपयोगस्य संवर्धनम्, शोधप्रधान-अध्ययनस्य अभिवृद्धिः, डिजिटल्-साधनानां यथायोग्यं प्रयोगः इत्यादयः विषयाः सम्यक् विचारिताः।





**कार्यक्रमसंयोजकः** प्रो. आनन्दरौत्मालेमहोदयः सप्ताहस्य सर्वकार्यक्रमाणां प्रतिवेदनं संक्षेपेण सभायां प्रस्तुतवान्। तेन पुस्तकालयकर्मचारिणाम्, आचार्यवर्गस्य, कार्यालय-कर्मचारिणां, स्वयंसेवकच्छात्राणां च एकचित्त-प्रयत्नस्य हार्दिकम् अभिनन्दनं कृतम्। अन्ते हार्दिकधन्यवादप्रस्तावेन सह समारोहः शान्तिपूर्वकं सम्पन्नः। एषः समापनसमारम्भः “नारायणीयम्” ज्ञानसंसाधन-केन्द्रस्य ज्ञानसंवर्धनकेन्द्ररूपेण, संस्कृतिसंरक्षणकेन्द्ररूपेण, तथा विद्याभ्यासस्य प्रेरणाकेन्द्ररूपेण महत्त्वं दृढीकृतवान्। सप्ताहस्य सफलसमाप्तिः पुस्तकालयस्य परिसरं प्रति श्रद्धां, निष्ठां, समर्पणं च पुनरुज्जीवितवती।












## विजेतृभ्यः पारितोषिकवितरणम्

राष्ट्रियपुस्तकालयसप्ताहस्य 2025 कार्यक्रमस्य पारितोषिकवितरणम् नवम्बर्-मासस्य २० तमे दिने "नारायणीयम्" महाकवि- मेल्पुत्तूर-नारायणभट्टतिरि-ज्ञानसंसाधन-केन्द्रे सम्पन्नम्। कार्यक्रमाध्यक्षस्य, संसाधन–विशेषज्ञस्य, संयोजकस्य, उपाध्यायानां च सान्निध्ये 14–20 नवम्बर् 2025 मध्ये आयोजितासु स्पर्धासु विजेतारः सम्मानिताः। सारणी-अनुसारेण प्रश्नोत्तरी–स्पर्धा, दुर्लभग्रन्थप्रदर्शनम्, नूतनागतग्रन्थप्रदर्शनम्, पुस्तकसमालोचनलेखनम्, मौखिकसमालोचना, लेखकस्पर्धा इत्यादिषु निर्णायकैः 1st, 2nd, 3rd स्थाने स्थिताः छात्राः चिताः। समारोहे नव विजेतारः पुरस्कारैः प्रमाणपत्रैश्च सम्मानिताः।

| Srn. | Date of | Activities | No. of Participants | Winners (1st/2nd &3rd) | Judges |
|---|---|---|---|---|---|
| **1** | 14.11.2025 | **Quiz Competition on Library and Reading Habits (1st Round)** | **55** | 23 participant was qualified | **03** |
| **2** | 15.11.2025 | Rare Book Exhibition (1st Round) | **Campus faculties Students, & visitors (14-20 Nov. 2025) open Working all days** | | **Library teams** |
| **3** | 16.11.2025 | New Arrival and Manuscripts Exhibition | | | |
| **4** | 17.11.2025 | Sanskrit Book review writing competition | **45** | **3 (1st/2nd &3rd)** | **03** |
| **5** | 18.11.2025 | **Sanskrit Book Review (Oral) Competition** | **33** | **3 (1st/2nd &3rd)** | **03** |
| **6** | 19.11.2025 | **Sanskrit Book Author Competitions (2nd Round)** | **23** | **3 (1st/2nd &3rd)** | **03** |
| **7** | 20.11.2025 | Valedictory function & winner's prize Distributions | **09** | **09 (1st/2nd &3rd)** | |

### विजेतृणां पारितोषिक वितरणम्






**Continue.....**









उपसंहारः – राष्ट्रियपुस्तकालयसप्ताहः २०२५

केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरे "नारायणीयम्" महाकवि-मेल्पुत्तूर-नारायणभट्टतिरि-ज्ञानसंसाधन-केन्द्रे राष्ट्रियपुस्तकालयसप्ताहः नवम्बर्-मासस्य १४–२० तमे सप्ताहे अत्यन्तं सफलतया आयोजितः। सप्ताहस्य मुख्यविषयः आसीत् "संस्कृतं ज्ञानविज्ञानयोः स्रोतः"। अस्मिन् सप्ताहे ग्रन्थालयप्रश्नोत्तरी, दुर्लभग्रन्थप्रदर्शनम्, नूतनागतग्रन्थप्रदर्शनम्, संस्कृतपुस्तकसमालोचनालेखनम्, मौखिकसमालोचना, संस्कृतलेखकस्पर्धा इत्यादयः विविधाः कार्यक्रमाः आयोजिताः। छात्राः, अध्यापकाः, अनध्यापककर्मचारिणश्च उत्साहपूर्वकं सहभागिभूताः। ग्रन्थालयसमूहस्य सुयोजनया प्रत्येकं कार्यक्रमः सुष्ठु सम्पन्नः। प्रतिस्पर्धं निर्णायकैः प्रथमस्थाने, द्वितीयस्थाने, तृतीयस्थाने च विजेतारः चिताः। नवम्बर्-मासस्य २० तमे दिने सम्पन्ने समापनसमारम्भे सप्ताहस्य समग्रफलितानि प्रकाशितानि। माननीय-अध्यक्षाः कार्यक्रमस्य शैक्षणिकसांस्कृतिकमहत्त्वम् अभिनन्दितवन्तः। नव विजेतृविद्यार्थिनः पुरस्कारैः प्रमाणपत्रैश्च सम्मानिताः। एवं सप्ताहोत्सवः छात्राणां पठनरुचिं, ग्रन्थालयजागरूकतां, संस्कृतसाहित्ये अनुरागं च वर्धयन् अत्यन्तं प्रेरणादायकः अभवत्। ज्ञानकेन्द्ररूपेण ग्रन्थालयस्य भूमिका पुनः दृढीकृता।

**PROF. ANAND RAUTMALE**
**DEPUTY LIBRARIAN**

**PROF. K.SHINE**
**DIRECTOR**

**Date: 26.11.2025**
**Place: Puranattukara PO**